## त्रयोदशः पाठः

# परिहास-कथा

(क्त्वा, क्तवतु)

[मिथिला में अपनी बौद्धिक क्षमता तथा परिहास-प्रियता के कारण गोनू झा की बहुत ख्याति है । उस क्षेत्र में प्रत्येक व्यक्ति इनकी कोई-न-कोई कथा सुनाता है जिसमें इनकी प्रत्यग्र बुद्धि की महत्ता मिलती है । प्रस्तुत पाठ में गोनू झा की एक ऐसी कथा दी गयी है जिसमें एक भैंस के बँटवारे का वर्णन है।]



एकदा मित्रयोर्मध्ये एकस्याः महिष्याः विषये अनुबन्धः अभवत् । तेन एकः तस्याः पूर्वार्धभागस्य स्वामी भवेत्, अपरः पश्चाद्भागस्य । पूर्वार्धभागस्य अधिकारी तु मूर्खः आसीत् । अपरस्तु चतुरः । महिष्याः पूर्वार्धभागे मुखं भवति । तस्य स्वामी महिषीं भोजनादिना सेवते । अपरार्धभागस्य स्वामी महिष्याः दुग्धं प्राप्नोति । इत्थं सर्वदा पूर्वार्धस्य अधिकारी एव वञ्चितः भवति स्म ।

स एकदा स्वमित्रं गोनू झा नामकं पण्डितं पृष्टवान् - भो: ! किं करोमि ? सदा वञ्चितोऽस्मि । गोनू झा तस्मै समुचितं परामर्शं दत्तवान् । तत: स महिषीं भोजनेन वञ्चितां कृतवान् । महिषी अतीव कुपिता । तत: स तां दोहनकालेऽपि दण्डप्रहारेण कोपितवान् । अथ महिषी कुपिता भूत्वा दोहनकाले पादप्रहारेण चतुरं मित्रं ताडितवती । स अकथयत् - भो: मित्र ! किमिदं करोषि ? मूर्ख: पूर्वार्धस्वामी अवदत् - अहं महिष्या: पूर्वार्धस्य स्वामी । यत् मे रोचते तदेव करोमि । अनेन तव किम् ? चतुर: मूको जात: । इदं स्वधूर्तताया: फलं ज्ञात्वा लज्जितश्च ।

तत: स पुन: महिषीविभाजनं निरर्थकं कथयित्वा तस्या महिष्या: भोजनदाने दुग्धग्रहणे च उभौ स्वामिनौ इति स्वीकृतवान् । तेन उभयो: लाभ: । अत: विभाजनं निरर्थकं न शोभते इति उपदेश: ।

## शब्दार्थ:

| | | |
|---|---|---|
| एकदा | = | एक बार |
| मित्रयो: | = | दो मित्रों के / में |
| मध्ये | = | बीच में |
| एकस्या: | = | एक की / का / के |
| महिष्या: | = | भैंस के / का / की |
| अनुबन्ध: | = | समझौता |
| तेन | = | उसके अनुसार, उससे |
| तस्या: | = | उसका / की / के |
| पूर्वार्धभागस्य | = | आगे के आधे हिस्से का |
| अपर: | = | दूसरा |
| पश्चाद्भागस्य | = | पीछे के हिस्से का |
| चतुर: | = | चालाक, होशियार |

| | | |
|---|---|---|
| प्राप्नोति | = | प्राप्त करता / करती है |
| सेवते | = | सेवा करता / करती हैं |
| इत्थम् | = | इस तरह |
| वञ्चितः | = | ठगा गया |
| पृष्टवान् | = | पूछा |
| तस्मै | = | उसे , उसको |
| परामर्शम् | = | सलाह |
| दत्तवान् | = | दिया |
| ततः | = | तब |
| दोहनकाले | = | दूहने के समय |
| दण्डप्रहारेण | = | लाठी मार कर |
| कोपितवान् | = | गुस्सा कर दिया |
| भूत्वा | = | होकर |
| पादप्रहारेण | = | पैर चलाकर |
| ताडितवती | = | मारा |
| अकथयत् | = | कहा |
| भोः | = | अरे |
| किमिदम् ( किम्+ इदम् ) | = | यह क्या |
| मे | = | मुझे, मुझको |
| रोचते | = | अच्छा लगता है |
| तदेव ( तत् + एव ) | = | वही |
| अनेन | = | इससे |
| मूकः | = | चुप, मौन |
| जातः | = | हो गया |

| | | |
|---|---|---|
| कथयित्वा | = | कहकर |
| उभौ | = | दोनों |
| स्वीकृतवान् | = | स्वीकार किया |
| उभयोः | = | दोनों का |

## व्याकरणम्

### सन्धिविच्छेदः

| | | |
|---|---|---|
| मित्रयोर्मध्ये | = मित्रयोः + मध्ये | (विसर्गसन्धिः) |
| अपरस्तु | = अपरः + तु | (विसर्गसन्धिः) |
| वञ्चितोऽस्मि | = वञ्चितः + अस्मि | (विसर्गसन्धिः) |
| दोहनकालेऽपि | = दोहनकाले + अपि | (पूर्वरूपसन्धिः) |
| पूर्वार्धस्य | = पूर्व + अर्धस्य | (दीर्घसन्धिः) |
| लज्जितश्च | = लज्जितः + च | (विसर्गसन्धिः) |

### प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| ज्ञात्वा | = | √ज्ञा + क्त्वा |
| कुपिता | = | √कुप् + क्त + टाप् |
| वञ्चितः | = | √वञ्च् + क्त |
| भूत्वा | = | √भू + क्त्वा |
| जातः | = | √जन् + क्त |
| कथयित्वा | = | √कथ् + णिच् + क्त्वा |

## अभ्यासः

**मौखिकः**

1. अधोलिखितानां पदानाम् उच्चारणं कुरुत -

प्रत्यग्रबुद्धिः, मित्रयोर्मध्ये, महिष्याः, अनुबन्धः, पूर्वार्धभागस्य, पश्चाद्भागस्य, अपरस्तु अपरार्धभागस्य, वञ्चितः, दोहनकालेऽपि, दण्डप्रहारेण, पादप्रहारेण, ताडितवती, पूर्वार्धस्वामी स्वधूर्ततायाः, लज्जितश्च, दुग्धग्रहणे ।

2. निम्नलिखितानां पदानां सन्धिविच्छेदं वदत -

(क) मित्रयोर्मध्ये

(ख) वञ्चितोऽस्मि

(ग) पूर्वार्धस्य

(घ) लज्जितश्च

(ङ) अपरस्तु

3. गोनू झा से संबंधित या उससे मिलती-जुलती एक अन्य कथा सुनाएँ ।

**लिखितः**

4. अधोलिखितानां पदानाम् अर्थं लिखत-

एकदा, महिष्याः, अनुबन्धः, पूर्वार्धभागस्य, पश्चाद्भागस्य, इत्थम्, रोचते ।

5. अधोलिखितानि पदानि अनुसृत्य सदृशानि पदानि लिखत -

दुग्धम्, वञ्चिताम्, महिष्याः, वञ्चितोऽस्मि, दण्डप्रहारेण

6. 'परिहास-कथा' पाठ से मिलती-जुलती एक अन्य कहानी लिखें ।

7. अधोलिखितानि अशुद्धानि पदानि शुद्धानि कृत्वा लिखत-

महिस्याः, परामर्षम्, पादप्रहारेन, भोजनादिणा, पृस्टवान्

3. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत -

(क) मित्रयोर्मध्ये कस्याः विषये अनुबन्धः अभवत् ?

(ख) महिष्याः पूर्वार्धभागस्य अधिकारी कः आसीत् ?

(ग) सर्वदा कः वञ्चितः भवति स्म ?

(घ) 'परिहास-कथा' इति पाठेन का शिक्षा मिलति ?

4. मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानानि पूरयत -

| |
|---|
| चतुरः, महिष्याः, मूर्खः, महिषी, मूको (मूकः) |

(क) एकदा मित्रयोर्मध्ये एकस्याः .................. विषये अनुबन्धः अभवत् ।

(ख) महिष्याः पश्चाद्भागस्य स्वामी .................. आसीत् ।

(ग) महिष्याः पूर्वार्धभागस्य स्वामी .................. आसीत् ।

(घ) दोहनकाले दण्डप्रहारेण .................. कुपिता जाता ।

(ङ) चतुरः .................. जातः ।

## योग्यता-विस्तारः

### गोनू झा की अन्य कथाएँ

### I. गोनू झा के घर चोर आये

एक रात गोनू झा की पत्नी ने कहा, 'लगता है घर के पास चोर खड़े हैं । अब क्या करें?' गोनू झा ने चोरों को सुनाते हुए कहा, 'तुम चिन्ता न करो । मैंने सारा कीमती सामान बगल के खेत में गाड़ दिया है ।'

यह सुन चोर खेत को कुदाल से खोदने लगे । सुबह होने से पहले गोनू झा पहुँचे और बोले, 'आप सबने मेरा खेत खोद दिया इसके लिए धन्यवाद ।' चोर लज्जित होकर लौट गये ।

कुछ दिनों बाद चोर फिर आये । पत्नी ने कहा, ''लगता है आज फिर चोर आये हैं ।''